217

Agnishtoma Prayoga.		: Title
:	:	: Author
:	:	: Editor
:	:	: Year, Vols.
:	:	: Publisher
217 :	:	: Remarks

१

॥ॐ॥ नमो भगवते मंगलेश्वरश्रीमद्दीप्तलक्ष्मीनृसिंहाय । यज्ञेश्वराय नमः ॥ गो
विंदशेषसुधियाशेषयज्ञेश्वरसूनुना । क्रमप्राप्तः प्रयोगोयमग्निष्टोमस्य लिख्यते
॥१॥ । अथाग्निष्टोम उच्यते तस्य वसंते पौर्णमास्याम[illegible]वास्यायां देवनक्षत्रे यज
नीये वा सुत्या दीक्षा वा ॥ एकातिस्रो वा दीक्षाः अमावास्यासुत्यायां तत्प्रतिपद्यपि
द्वादश्यां ॥ बह्वीदीक्षास्वेतिमद्दिने प्रवर्ग्यसंभरणं ॥ एकदीक्षायां तद्दिने चरणात्पुरो वा ॥
पित्रादिषु सोमपेष्वैंद्राग्नः पशुः दुर्ब्राह्मणस्याश्विनः सवनत्रिपुरुषं विच्छिन्नवेदवेदिः ।
तस्य प्रयोगः पूर्वेद्युर्नांदीमुखं रात्रावुदकशांतिं प्रतिसरबंधं च कृत्वा श्वः स्नात्वादि पंच
कं अध्वर्युगणस्याग्नीध्रस्य ॥ पुण्याहे इंद्रादयः प्रीयंतां ॥ पश्चाद्गार्हपत्यस्य याः पु १

रस्तादित्यादि निविष्टमित्यंते विच्छिन्नसोमपीथसंधानार्थमैंद्राग्नं पशुं दौर्ब्राह्मण्य
परिहारार्थमाश्विनं च अग्नीषोमीयेण समानतंत्रं कुर्वन्द्वादशस्तोत्रेण रथंतरसाम्ना
श्रातगवद्दक्षिणेन ज्योतिष्टोमेनाग्निष्टोमेन चतुष्टोमेन स्वर्गकामः सोमेन यक्ष्ये ॥ त्रिरु
पांशु त्रिरुच्चैः तन्मइत्यादि श्रौंतयेत्यंतं सोमादि द्रव्यं इंद्रादयो देवताः ॥ अस्मिन्ज्योति
ष्टोमे सोमे सोमप्रवाकं [illegible] त्वामहं वृणे ॥ स भविष्यामि ॥ सोमप्रवाकस्य लौकिकं वरणं
कृत्वा सोमप्रवाकः सोमं मे प्रब्रूह्यृत्विग्भ्यः केभ्य इति तेन पृष्टे देवदत्तादिभ्य इति प्रत्य
हो [illegible] नध्वर्युऋत्विजां नामान्याह ॥ सोमप्रवाकः ब्रह्मादीनां गृहेषु क्रमेण गत्वा यइद
न्नशर्मणः सोमो भविष्यति तत्र भवता ब्रह्मत्वं हौत्रमाध्वर्यवमौद्गात्रं वा कर्तव्यमिति

२

यथायोगं गृह्णाति० तेपि कोयज्ञः कस्य ऋत्विजः का दक्षिणेति० सः० ज्योतिष्टोमोग्निष्टो
मः मैंगनाथशर्मादयः शतं गाव इत्यादियथार्थमित्यादि० यजमानः तान् क्रमेणाधान
वद् वृत्वार्हयति० द्वितीयदिनस्तृतीयदिनः पादिनः क्रमेण दशचमसाध्वर्युन्परिकर्मिण
श्च सोमप्रवाकवद् वृत्वार्हयति। अध्वर्युः तीर्थेन प्रविश्येडादिशांतिं जपित्वा पशुबंध
वद्यजमानेन सह दारण्योरग्निं समारोपयति० अयं त इत्यादि०। यजमानः। उदकुंभं
पुरस्कृत्य पत्न्यन्वारब्धः ससोमारणीकः सर्वैः संभारैर्ऋत्विग्भिः शांतिपाठपुरस्स
रं पूर्वाह्णे दक्षिणतः पश्चाद्वा चेत् उत्तरेण शालां परीत्य पूर्वया द्वारा प्रविशति०।
सा च पूर्वमेव कारिता भवति० प्राचीनवंशा दिक्षुवती काश्या दक्षिणतो वर्षीयसी २.

चतुर्दिक्षु द्यरत्निमध्यद्वारचतुष्टयवती०। षोडशप्रक्रमव्यासा द्वादशप्रक्रमवि
स्तीर्णा दीर्घचतुरस्रा०। तस्या दक्षिणतो व्रतश्रपणागारं० पश्चात्पत्नीशाला०। प्रा
ग्वंशस्य पश्चिमाद्धं कोरत्नुस्यं द्वासार्धपदत्रयं सार्द्धतिलद्वयाधिकांगुलद्वयं च मुक्त्वा
शंकुं निहंति स गार्हपत्यस्य मध्यशंकुः। सार्द्धतिलद्वयाधिकसप्तदशांगुलरज्वा
तत्र पाशं प्रतिमुच्य मंडलं परिलिखति तद्गार्हपत्यस्यायतनं। एवं च पश्चाद्गार्ह
पत्यस्य सार्द्धपदद्वयमवशिष्टं भवति० पंचतिलाधिकचतुस्त्रिंशदंगुलं च गा
र्हपत्यायतनं। प्राग्वंशपूर्वशंकोः पत्यं च मनुस्यं द्वासार्द्धपदपदद्वये शंकुं नि
हंति स आहवनीयस्य मध्यो द्विपदमाहवनीयायतनं। आहवनीयस्या

३

ग्रेसार्द्धपदमवशिष्टंभवति। गार्हपत्याहवनीययोरंतरालंपंचधाषोढावेत्यादिद
क्षिणाग्नेर्मध्यदेशंकल्पयित्वाशंकुंनिहत्यसपादपंचतिलाधिकचतुर्विंशत्यंगुल
यारज्ज्वामंडलंपरिलिख्यमध्यशंकोरंजसाउदक्सपादतिलद्वयाधिकषडंगुले
शंकुंनिहत्यतत्रपाशंप्रतिमुच्यतयैवरज्ज्वामंडलंपरिलिख्यतयोःसंसर्गोनिय
म्योत्तरंधनुःसृजेत्। दक्षिणंदक्षिणाग्नेरायतनं। आपरेणाहवनीयंप्राकृता
वेदिःतत्पश्चादवशिष्टोविशामः। इत्यंतादंतपक्षेणद्वादशिकोविहारः शेषं
प्रकृतिवत्। ऋत्विजस्तीर्थेनप्रविश्यमेडादिशांतिंजपंति। अध्वर्युःपशुबंधव
न्मथित्वा। आयतनानिउद्धृत्यावोक्ष्याग्नीन्विहृत्यपरिस्तीर्यपरिषिच्यगार्हपत्या ३

चि

स्मार्तवदाज्यंसंस्कृत्यस्रुचिचतुर्गृहीतामनस्वत्याहवनीयेजुहोतीतिपुनर्विहृत्य।
अध्वर्युब्रह्माग्नीयजमानाययथायतनंपूर्वांशांतिंजपंति। नमोवाचेयाचोदिता
याचानुदितातस्यैवाचेनमोनमोवाचेनमोवाचस्पतयेनमऋषिभ्योमंत्रकृद्भ्यो
मंत्रपतिभ्योमामामृषयोमंत्रकृतोमंत्रपतयःपरादुर्माहमृषीन्मंत्रकृतोमं
त्रपतीन्परादांवैश्वदेवींवाचमुद्यासंशिवामदस्तांजुष्टांदेवेभ्यःशर्ममेद्यौः
शर्मपृथिवीशर्मविश्वमिदंजगत्। शर्मचंद्रश्चसूर्यश्चशर्मब्रह्मप्रजापती। भूतं
वदिष्येभुवनंवदिष्येतेजोवदिष्येयशोवदिष्येतपोवदिष्येब्रह्मवदिष्येसत्यंव
दिष्येतस्माइदमिदमुपस्तरणमुपस्तरणउपस्तरणंमेप्रजायैपशूनांभूया

दुपस्तरणमदं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा
हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि०। पितरोनुमदंतु ४ शांतिः त्रिः ३।
अध्वर्युः अग्नेर्दक्षिणतो धनुर्मात्रे गर्तं खात्वा। भावितया मृदाभिपूर्य। तदुत्त
रतस्तृणोद्भूदं चिवराद्विहतं वल्मीकवपां शुक्लां दूर्वां किसेष्ठामापाद्य कृत्वा
साद्य संभाराणामुत्तरतः प्रागग्रेषु दर्भेषु कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमा
स्तीर्य। उत्तरस्य शालाखंडस्याग्रे स्फ्येनोद्धृत्यावोक्ष्य सेकतं परिमंडलं खरं कुशै
र्दूर्वाभिः प्रच्छाद्य। परिश्रित्योदीचीं द्वारं कृत्वोपसादयत्यर्मकपालान्यधिष्ठानि चाकै
राधिष्ठानि। अन कृष्णाजिनलोमानि फलकं वेणुशलाकां कर्त्तारं कुशालं सं ५

निधाप्य। गार्हपत्ये प्रवर्ग्यमदंती रधिश्रित्य। वेद्यामुभयतस्तृष्णामरत्निमात्रीं वै
णवीमश्वीं प्राचीं निधाय। द्वारशिपत्नीं श्रित्य पत्नीशालेपत्नीमुपवेश्य। अन्तीन्प
रिस्तीर्य। दक्षिणेनाहवनीयं ब्रह्मयजमानावुपवेश्य। आहवनीये चतुर्गृहीतं
जुहोत्यन्वारब्धे यजमाने। १। युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो वि
६ पश्चितः। विहोत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा। देवा
य सवित्र इदं०। दीक्षितस्य जपति। देवस्य त्वा० आददे। अभ्रिमादाय। अभ्रिरसि
नारिरस्य ध्वरकृद्देवेभ्यः। अभिमंत्र्य। उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे। उप
प्रयंतु मरुतः सुदानव इंद्र प्राशूर्भवा सचा। उत्थाय। प्रैतु ब्रह्मणस्पतिः प्रदेव्यै

तुसूनृता । अच्छावीरंनर्यंपंक्तिराधसंदेवायज्ञंनयंतुनः । तीर्थेननिष्क्रम्य । दक्षिण
तोब्रह्मयजमानावुपवेश्य । देवीद्यावापृथिवी अनुमेमꣳसाथां । मृदमुपस्थाय ।
ऋध्यासमद्यमखस्यशिरः । अभ्यादाहृत्य । अपउपस्पृश्य । मखायत्वा । हृत्वा ।
मखस्यत्वाशीर्ष्णे । उत्तरतः कृष्णाजिनेनुप्य । ऋध्यासमित्याद्येवंद्वितीयंतृती
यं । तूष्णींचतुर्थंमृदंपरिशोष्य । इयत्यग्र आसीः । वराहविहतमुपस्थाय । ऋ
ध्यासमित्यादिपूर्ववत् । देवीर्वम्रीरस्यभूतस्यप्रथमजाऋतावरीः । वल्मी
कवपामुपस्थाय । ऋध्यासमित्यादिपूर्ववत् । इंद्रस्यौजोसि । दूर्वामुपस्थाय । ५
ऋध्यासंप्राग्वत् । अग्निजा असिप्रजापतेरेतः । छागापयउपस्थाय । ऋध्या

संप्राग्वत् । आवपरिशिनष्टि । मृद्वर्जमतिशेषान्नैवप्रकिरति । अध्वर्युब्रह्म
यजमानाः अन्यतोमुखानिकृत्वा अनभिप्रश्वसंतः प्रवर्ग्यादित्ययोर्व्यवधा
नमकुर्वंतः । प्रैतुब्रह्मणस्पतिःप्रदेव्येतुसूनृता । अच्छावीरंन० । यज्ञमानयंतु
नः प्रवर्ग्यमानीय । १ । आयुर्धेहिप्राणंधेह्यपानंधेहिव्यानंधेहिचक्षुर्धेहि
श्रोत्रंधेहिमनोधेहिवाचंधेह्यात्मानंधेहिप्रतिष्ठांधेहिमांधेहिमयिधेहि ।
खरेसादयंति । अध्वर्युः अर्मकपालशर्करापिष्टैरजकृष्णाजिनलोमभिश्च
मृदंसंसृज्य । मधुत्वामधुलाकरोतु । मदंतीभिः संयुत्य । मखस्यशिरोसि ।
किंचित्परिशोष्य । पिंडंकृत्वा । यज्ञस्यपदेस्थः । अंगुष्ठाभ्यांद्वेधाविभज्यैक

६

स्त्रीन्पिंडान्कृत्वा। गायत्त्रोसि। तेषामेकंकर्त्रे प्रयच्छति। कर्त्ता। गायत्रेणत्वा छं
दसा करोमि। तेन महावीरस्य मूलं करोति। अध्वर्युः। त्रैष्टुभोसि। द्वितीयं प्र
यच्छति। कर्त्ता। त्रैष्टुभेनत्वा छंदसा करोमि। तेन मध्यं करोति। अध्वर्युः जाग
तोसि। तृतीयं प्रयच्छति। कर्त्ता। जागतेनत्वा छंदसा करोमि। तेन बिलं कृत्वा।
महावीरं प्रादेशोच्छ्रायं पृथुबुध्नं पृथुग्रीवं मध्ये सन्नतं कृत्वा वेणुशलाकयोदरं कृ
त्वा बिलस्याधस्त्र्यंगुले रास्नां परिमंडलं पर्यस्यति। मखस्य रास्नासि। बिलं
विवृणोति। अदितिस्ते बिलं गृह्णातु पांक्तेन छंदसा। महावीरमादित्येना
मितयति। । सूर्यस्य हरसा श्राय। स्वरे निदधाति। अध्वर्युः निहितमनुमं ६

न्त्रयते। मखोसि। गायत्रोसीत्यादि। एवं द्वितीयमेवं तृतीयं। अवशोषितया
मृदा सशोषयात्रस्त्रीं पिन्वने रौहिणकपाले आज्यस्थालीं करोति। अतिशोषि
तया मृदापि सशोषया प्रवाते प्रवाति। लिप्योपवातयति। अध्वर्युः महावीरेषूप
वातेषु। गार्हपत्यादग्निमाहृत्य पुंसोश्वस्यैकविंशतिशकृत्पिंडानादीप्य। वृष्णो
अश्वस्य निष्पदसि वरुणस्त्वा धृतव्रत आधूपयतु मित्रावरुणयोर्ध्रुवेण ध
र्मणा। मंत्रावृत्याक्रमेण महावीरानंतर्बहिश्च धूपयति। त्रस्त्रीपिन्वनादीनि।
उत्तरेण शालामवटं खात्वा पचनेनावस्तीर्य उदग्बिलान्महावीरानायातयति।
पुरस्तात्पिन्वने पश्चाद्रौहिणकपाले आज्यस्थालीं। इंधनेनोपरिष्टात्संछाद्य

७

मृदाचलिंपति।३। अर्चिर्षेत्वा।पुरस्तादुपोषति।शोचिषेत्वा।दक्षिणतः।ज्योतिर्षे
षेत्वा।पश्चात् [redacted] तपसेत्वा।उत्तरतः।पक्वेषु।गोपयस्यजापयोधुक्षिमन्नमसंदा
वंसतंसंदंशंखारीशिक्यंकृष्णाजिनमित्यादाय।अभीमंमहिनादिवंमि
त्रोबभूवसप्रथाः।उतश्रवसापृथिवींमित्रस्यचर्षणीधृतः।श्रवोदेवस्यसा
नसिं।द्युम्नंचित्रश्रवस्तमं।आपाकमभ्येति।सिध्यैत्वा।धुक्षिमादाय।देव
स्त्वासवितोद्वपतु।सुपाणिःस्वंगुरिःसुबाहुरुतशक्त्या।प्रथमान्महावीरादं
गारानुद्वपति।इतिप्रभृतिहन्मवोघर्मस्ते।प्रभुवस्त्वं।संदंशेनोपयुयति।अपद्य
मानःपृथिव्यामाशादिशआपृण।स्वस्थानेसादयति।सूर्यस्यत्वाचक्षुषा ७

विशापरुभि

न्वीक्षइनवैत्वासाधवैत्वासुक्षित्यैत्वाभूत्यैत्वा।महावीरमीक्षते।इदमहमसु
वींमामुष्यायणंब्रह्मवर्चसेनपर्यूहामि।यथानामगोत्रं।प्रदक्षिणंपुरीषेण
पर्यूहति।संदंशेनसत्तेवधाय।गायत्रेणत्वाछंदसाछृणद्मित्रैष्टुभेनत्वा
छंदसाछृणद्मिजागतेनत्वाछंदसाछृणद्मि [illegible] छृणत्तुत्वावाक्
छृणत्तुत्वोर्क्छृणत्तुत्वाहविश्छृंधिवाचंछृंधिऊर्जंछृंधिहविर्देवपुरश्चरसघ्या
संत्वा।अंतर्वेदिश्लक्ष्णागापयसाछृत्वा।गोपयसाभिषिंचतित्रस्त्रीं।एवंद्वितीय
मेवंतृतीयंदेवस्त्वेत्यादि।त्रस्त्रींपिन्वनादीनि।सर्वखार्यांनिधायकृष्णाजिने
नप्रच्छाद्योत्तरेणशालाखंडेशिक्येस्थापयति।यथापत्नीनपश्यति।पूर्ववदु

तरां शांतिं जपंति ।। शन्नो वातः पवतां मातरिश्वा शन्नस्तपतु सूर्यः । अहानि
शं भवंतु नः शं रात्रिः प्रति धीयतां । शमुषा नो व्युछतु शमादित्य उदेतु नः शि
वा नः शं तमा भव सुमृडीका सरस्वती मा ते व्योम संदृशि ।। इडासि वा स्त्वसि वास्तु
मद्वास्तुमंतो भूयास्म मा वास्तोश्छित्स्मह्य वास्तुः स भूयाद्यो स्मान्द्वेष्टि यं च व
यं द्विष्मः । प्रतिष्ठासि प्रतिष्ठावंतो भूयास्म मा प्रतिष्ठायाश्छित्स्मह्य प्रतिष्ठः स भूया
द्यो स्मान्द्वेष्टि यं च वयं द्विष्मः ।। आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं हि वि
श्वभेषजो देवानां दूत ईयसे ।। द्वाविमौ वातौ वात आसिंधोरा परावतः । दक्षं मे अन्य ८
आ वातु परान्यो वातु यद्रपः । यददो वात ते गृहे मृतस्य निधिर्हितः । ततो नो देहि

जीवसे ततो नो धेहि भेषजं । ततो नो मह आ वह वात आ वातु भेषजं शंभूर्मयोभू
र्नो हृदे । प्रण आयूंषि तारिषत् ।। इंद्रस्य गृहो सि तं त्वा प्रपद्ये सगुः साश्वः । सह यन्मे
अस्ति तेन ।। भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्ये नार्तां
देवतां प्रपद्ये श्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य ओं प्रपद्ये ।। अं
तरिक्षं म उर्वंतरं बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या स्वस्तिमान्तया स्वस्त्या स्व
स्तिमान सानि ।। प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मयि मेधां मयि
प्रजां मय्यग्निस्तेजो दधातु मयि मेधां ० यीद्रं इंद्रि ० तु मयि ० मयि प्रजां मयि सूर्यो भ्रा
जो दधातु ।। द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो व

रणो॰ उतद्यौः। कयानश्चित्र॰ शांतंभवास्यूतिभिः। वयः सुपर्णा उपसेदुरिंद्रंप्रियमेधा
ऋषयोनाधमानाः। अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुग्ध्यस्मान्निधयेवबद्धान्। शन्नोदे
वी॰ नः। ईशा॰ षूर्जं। सुमित्रान॰ द्विष्मः। आपोहिष्ठामं॰ थाचनः। पृथिवीशांतासाग्नि
नाशांतासामेशांताशुचंशमयतु। अंतरिक्षंशांतंतद्वायुनाशांतंतन्मेशांतंशु
चंशमयतु। द्यौःशांतासादित्येनशांतासामेशांताशुचंशमयतु। पृथिवीशांति
रंतरिक्षंशांतिर्द्यौःशांतिर्दिशःशांतिरवांतरदिशाःशांतिरग्निःशांतिर्वायुःशां
तिरादित्यःशांतिश्चंद्रमाःशांतिर्नक्षत्राणिशांतिरापःशांतिरोषधयःशांतिर्वन
स्पतयःशांतिर्गौःशांतिरजाशांतिरश्वःशांतिःपुरुषःशांतिर्ब्रह्मशांतिर्ब्राह्मणः ८

शांतिःशांतिरेवशांतिःशांतिर्मेअस्तुशांतिः। तयाहंशांत्यासर्वशांत्यामह्यंद्वि
पदेचचतुष्पदेचशांतिंकरोमिशांतिर्मेअस्तुशांतिः। एहश्रीश्चह्रीश्चधृतिश्चतपो
मेधाप्रतिष्ठाश्रद्धासत्यंधर्मश्चैतानिमोत्तिष्ठंतमनूत्तिष्ठंतुमामाम्। श्रीश्चह्रीश्च
धृतिश्चतपोमेधाप्रतिष्ठाश्रद्धासत्यंधर्मश्चैतानिमामाहासिषुः। उदायुषास्वा
युषोदोषधीनांरसेनोत्पर्जन्यस्यशुष्मेणोदस्थाममृतांअनु। तच्चक्षुर्देवहि
तंपुरस्ताच्छुक्रमुच्चरत्। पश्येमशरदःशतंजीवेमशरदःशतंनंदामशरदःशतं
मोदामशरदःशतंभवामशरदःशतंशृणवामशरदःशतंप्रब्रवामशरदःशा
तमजीताःस्यामशरदःशतंज्योक्चसूर्यंदृशे। यउदगान्महतोर्णवाद्विभ्राजमानः

१० ण

सरिरस्यमध्यात्समारभ्यभोलोहिताक्षः सूर्योविपश्चिन्मनसापुनातु।ब्रह्मंश्चोतन्य
सिब्रह्मणआत्मास्थोब्रह्मणआवपनमसिधारितेयंपृथिवीब्रह्मणामहीधारि
दा तमेनेनमहदंतरिक्षंदिवंधारपृथिवींसदेवांयदहंवेदतदहंधारयाणिमामद्वेदो
धिविस्रसत्।मेधामनीषेमाविशतांसमीचीभूतस्यभव्यस्यावरुध्यैसर्वमायुर
याणिसर्वमायुरयाणि।आभिर्गीर्भिर्यदतोऽस्यामा।ब्रह्मप्रवादिष्मंतन्नोमाहा
सीत्।ओंभूःशांतिःशांतिःशांतिः।ध।यजमानः।जघनेनगार्हपत्यमुपविश्य।।
आज्यंपशवःपुरोडाशीयाःएतेमेयज्ञार्थायावद्धहउपयोक्ष्येतावन्मेयज्ञार्थंत्रो
षाद्भासनाभ्रुजीरन्संकल्प्यइदमहंस्वे।एदमगन्मदेवयजनंपृथिव्याविश्वेदेवायद १०

जुषंतपूर्वे।ऋक्सामाभ्यांयजुषासंतरंतोरायस्पोषेणसमिषामदेम।इतःपश्चादितउ
त्तरतइतःपुरस्तादितोदक्षिणतःप्रागादिदेवयजनमध्यवस्यति।अध्वर्युःअंतरेणवेदी
त्करौप्रपाद्यमध्यमेवंशेराजानंबध्वा।पुनर्विहृत्यपरिस्तीर्यदक्षिणतोब्रह्मयजमाना
वुपवेश्य।स्रुचिचतुर्गृहीतंगृहीत्वा।महाहविर्होता।सत्यहविरध्वर्युः।अच्युतपाजा
अग्नीत्।अच्युतमनाउपवक्ता।अनाधृष्यश्चाप्रतिधृष्यश्चयज्ञस्याभिगरौ।अया
स्यउद्गाता।वाचस्पतेहृद्विधेनामन्।विधेमतेनाम।विधेस्त्वमस्माकंनाम।वाचस्पतिः
म सोमंपात्।मास्मैस्यस्तंतुम्छेदि।मामनुष्याः।नमोदिवे।नमःपृथिव्यैस्वाहा।आहवनी
येजुहोत्यन्वारब्धेयजमानेमनसाहुत्वा।वाचस्पतयेब्रह्मणइदं।पुनर्विहृत्यकूर्मा

२१

डेकृत्वोपस्थायवरदानांते।पुनर्विहृत्यचतुर्गृहीत्वा।उरुविष्णोविक्रमस्वोरुक्षयायनः
कृधि।घृतंघृतयोनेपिबप्रप्रयज्ञपतिंतिरस्वाहा।विष्णवइदं०।अपरंचतुर्गृहीत्वा।
आज्यस्थालींसस्रुवांबर्हिर्हिरण्यमुदपात्रमादाय।सपरश्वंतक्ष्याणमाहूय।
एदीयमान।पूर्वयाद्वारोपनिष्क्रम्य।अत्यन्यानगान्नान्यानुपागामर्वाक्त्वाप
रैरविदंपरोवरैस्तंत्वाजुषेवैष्णवंदेवयज्यायै।इत्यकृष्टद्रुमुपस्थाय।देवस्त्वा
सवितामध्वानक्तु।आज्यस्थाल्याःस्रुवेणयूपमूलमनक्ति।ओषधेत्रायस्वैनं।
मूलेऊर्ध्वाग्रंबर्हिरन्तर्धापयति।स्वधितेमैनंहिंसीः।तदुपरिस्वधितिनातिर्यं
कुप्रहरति।प्रथमशकलंयूपावटायप्रज्ञातंनिदधाति।यूपंछित्वापउपस्पृश्य। २१

अ दिवमग्रेणमालेखीरंतरिक्षंमध्येनमाहिंसीःपृथिव्यासंभव।प्राञ्चंमुदंचंवापतंत
मनुमंत्रयते।आव्रश्चनेहिरण्यंनिधायपरिस्तीर्यपरिषिच्य।वनस्पतेशतवल्शोवि
रोहस्वाहा।पूर्वाहृतंचतुर्गृहीतंजुहोति।वनस्पतयइदं।सहस्रवल्शाविवयंरुहेम।
आत्मानमभिमृश्य।अपउपस्पृश्य।हस्तपरिघंगपरमंत्रादेशावमं।उपरेणसह
पंचारत्निंचषालस्यापनार्थकचतुरंगुलाधिकं।अच्छिन्नोरायःसुवीरः।अग्रतश्छि
नत्ति।छिन्नशेषमूलेचतुरंगुलंछित्वासच्छिद्रंचषालंकृत्वायूपाग्रेचतुरंगुलंसंत
क्ष्यतस्मिन्प्रवेशयति।मूलेऽरत्निमुपरंत्यक्त्वावशिष्टमष्टाश्रिंकरोति।स्वरुंनवाधि
मंथनानि।अवतक्षणानिप्रज्ञातानिनिधाय।यूपमाहृत्य।प।पत्नीयजमानौ।व्रत

अपरागारे क्षुरादिरहितं सर्पिर्मिश्रं पयोमिश्रं वा व्रतयतः। इ। उद्धरणपक्षे आदौ
दीक्षणीयातो दीक्षा। अध्वर्युः वाससी क्षुरं द्वाविंशति दर्भपुंजीलानि नवनीतमांजनं
सतूलां शरेषीकामादाय गच्छति यजमान। प्रतिप्रस्थाता चापरिमितान्दर्भपिंजूलान्सद
पत्न्याः। पूर्वया द्वारा तीर्थं गत्वा अध्वर्युः। आप उंदंतु जीवसे दीर्घायुत्वाय वर्चसे यजमा
नस्य प्राङ्मुखस्यासीनस्य दक्षिणं गोदानमद्भिरुनत्ति। ओषधे त्रायस्वैनं। एकं दर्भपिं
जूलस्यैकं भागमूर्ध्वाग्रमन्तर्दधाति। स्वधिते मैनं हिंसीः। स्वधितिं तिर्यंचं निधा
य देव श्रूरेतानि प्रवपे वपति। यजमानः। स्वस्त्युत्तराण्यशीय। उप्तान्प्रत्यभिमन्त्र
ते। एवं द्वितीयस्य कृत्वा। नापितो केशश्मश्रूं मे निकृंतन नखैं प्रकृतात्। नापिताय १२
खं

क्षुरं प्रयच्छन्नाह। प्रतिप्रस्थाता। पत्न्या दक्षिणं मुपपक्षमित्यादि तूष्णीं कृत्वा। नावि
तो प्रोपपक्षौ मे निकृंतन खां प्रकृतात्। स तथा प्राह। उभयोर्नखनिकृंतनं सव्यस्या
ग्रे कनिष्ठिकातः। अध्वर्युः आपो अस्मान्मातरः शुंधंतु घृतेन नो घृतप्वः पुनंतु।
यजमानमभिषिंचति। विश्वमस्मात्प्रवहंतु रिप्रं। संप्रधाव्य रजः प्रक्षालयति। यजमा
नः। उदाभ्यः शुचिरापूत एमि। तीरमेति। वनस्यांतेन प्रतिष्ठाय तिरः पवित्रं पय
स्वत्याचम्य। सोमस्य तनूरसि तनुवं मे पाहि। प्रदक्षिणं अहतं वासः परिधत्ते। म
हीनां पयो सि वर्चोधा असि वर्चो मयि धेहि। पाणिभ्यां नवनीतं संप्रक्षाल्य मुखम
भ्यंक्ते। तूष्णीमनुलोममंगानि। इ। एवमध्वर्युः। प्रतिप्रस्थाता अभिषेकादि सर्वं ति

ष्णीपत्न्याः साभ्यंक्ते आंक्ते। अध्वर्युः प्रत्यङ्मुख उपविश्य प्राङ्मुखस्य यजमानस्य
सव्येन पाणिना नारेषीकया दक्षिणमक्ष्यनक्ति। वृत्रस्य कनीनिकासि चक्षुष्या असि
चक्षुर्मे पाहि। सकृन्मंत्रेण द्विस्तूष्णीं। द्विः सव्यं मंत्रेण। चित्पतिस्त्वा पुनात्वच्छिद्रेण
पवित्रेण व० रश्मिभिः। सप्तभिर्दर्भैर्मुखं पावयति। वाक्पतिस्त्वा पुनात्वच्छिद्रे०भिः।
सप्तभिर्नाभिं। देवस्त्वा सविता पु०भिः। सप्तभिर्गुल्फैः। तानिप्रोक्ष्योद्द्रिरस्य। तस्य ते
पवित्रपते पवित्रेणायस्मैकं पुनेतच्छकेयं। यजमानं वाचयति। एवं प्रतिप्रस्थाता
पत्नीमपरिमितैर्दर्भपिंजूलैस्तूष्णीं। अध्वर्युः आत्मनः सव्यं पाणिं यजमानेन ग्रा
हयित्वा। आ वो देवास ईमहे सत्यधर्माणो अध्वरे। यद्वो देवास आगुरे यज्ञियासो १३

हवामहे। शालामानयति। इंद्राग्नी द्यावापृथिवी आप ओषधीः। पूर्वया द्वारा प्रवे
शयति। तीर्थेन प्रविश्याग्रेणाहवनीयं नीत्वा दक्षिणत उदङ्मुखं कृत्वा निरसन उप
वेशय। त्वं दीक्षाणामधिपतिरसि। आहवनीयमीक्षयति। उभयोर्मंत्रः। उभौ। इह
मा संतं पाहि। स्वात्मानमीक्षते। प्रतिप्रस्थाता। पत्नीमपरया द्वारा प्रवेशय। प्रैतु
ब्रह्मणस्पती वेदिं वर्णेन सीदतु। अथाहमनु कामिनी स्वे लोके विशा इह। उत्तरे
ण गार्हपत्यं प्राचीमुदानयन्वाचयति। सा तीर्थेन प्रविश्य स्वासने निरसनं कृत्वा।
सुप्रजसस्त्वा०भ्यां। उपविशति। यजमानः। जघनेन गार्हपत्यमुपविश्य। दीक्षणीये
ष्ट्यायक्ष्ये। अग्नीषोमावाज्यभागौ। आग्नावैष्णव एकादशकपालः पुरोडाशः

देवा आज्यपा इत्यादि प्रधानमुपांशु। अध्वर्युः। सकृदासंस्थायै देवा गातुविद इति
जपित्वा विहृत्यान्वाधानाद्याज्येडांतादीक्षणीयां दिवैव संस्थापयति। नेदमादि
व्रतग्रहणब्रह्मवरणपत्निसंनहनाद्यूनेतिरिक्तवाचनांतब्रह्मयजमानभागच
तुर्धाकरणान्वाहार्यफलीकरणसमिष्टयजुः प्रणीताविमोचनविष्णुक्रमाः। तत्
स्त्वांत्रयोविष्णुः रातिषा। अग्नाविष्णुभ्यामित्यादिहोमो यथास्थानं। स्वाहेत्यनुमंत्र
णं यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयान्मंद्रं प्रायणीयायां
मंद्रतरमातिथ्यायामुपांशूपसत्सु आग्नेय्येडांते उरु विष्णो वि क्रमस्वेत्येव कृत्वा प्रा
ङ्त्याध्वर्युरेवमंत्रेण ध्रुवामाप्याय्याज्यस्थाल्यां प्रत्यवनीय यजमाने। नान्वारब्ध आ १५

आज्यस्थाल्याः स्रुवेण चतस्रो दीक्षाहुतीर्जुहोति। आकूत्यै प्रयुजेऽग्नये स्वाहा। यथा
लिंगं त्यागः। मेधायै मनसेऽग्नये स्वाहा। दीक्षायै तपसेऽग्नये स्वाहा। सरस्वत्यै पूष्णे
ऽग्नये स्वाहा। स्रुवा चतुर्गृहीतं। आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वंत
रिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा। अद्भ्यो द्यावापृथिवीभ्यामंतरिक्षाय बृ
हस्पतय इदं०। पुनश्चतुर्गृहीतेन स्रुचं पूरयित्वा। विश्वे देवस्य नेतुर्मर्तो वृणीत स
ख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा। कालात्मने सवित्र इदं। त्रस्तो
मंतवैदिषणीतानि नीय अग्रेणाहवनीयं पर्याहृत्य यजमानाय प्रयच्छति कृ
ष्णाजिनं सांगं कृष्णविषाणां वासो मेखलामौदुंबरं दंडमुष्णीषं चप्रतिप्रस्थाता

पत्न्यै कुंबं कुरीरं वासो योक्त्रं चांकुं च॥ अध्वर्युः यजमानायतने सांगं कृष्णाजिनं
प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। यजमानः ऋक्सामयोः शिल्पे स्थस्ते वामा
रभे ते मा पातमास्य यज्ञस्योदृचः। पश्चात्प्राङ् उपविश्य दक्षिणांगुष्ठांगुलीभिः
शुक्लकृष्णे संस्पृशति। इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम। दक्षिणं जान्वाच्यामिस
पीति। उपस्थं कृत्वा। ऊर्गस्यांगिरस्यूर्णम्रदा ऊर्जं मे यच्छ। कटिप्रदेशे प्रदक्षिणं
मेखलां पर्यस्यति। प्राहि मा मा मा हिंसीः। निष्टर्क्यग्रंथिं करोति। प्रतिप्रस्था
ता। आशासाना सौ॰ यक्त्रं। संत्वा नह्यामि पयसा घृतेन संत्वा नह्याम्यप ओषधी १५

भिः। संत्वा नह्यामि प्रजया हमद्य सा दीक्षिता सनवो वाजमस्मे। पत्नी योक्त्रेण सन्न
ह्यति। अध्वर्युः विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ। यजमानं वाससा
प्रोर्णोति। नक्षत्राणां मातीकाशात्पाहि। वसनस्यातीकाशे ध्रुवा वयति। वसनां
तान् शिरस्येव संक्षिप्य। श्रिया ते शिरो वेष्टयामि श्रियै यशसे ब्रह्मवर्चसाय।
उष्णीषेण प्रदक्षिणं शिरो वेष्टयति। प्रतिप्रस्थाता पत्न्यै कुंबं कुरीरमध्यूह
ति त्वसी। अध्वर्युः इंद्रस्य योनिरसि। यजमानाय त्रिवलिं पंचवलिं वा कृ
ष्णविषाणां शाण्या रज्वा बद्धां प्रयच्छति। यजमानः मा मा हिंसीः। प्रतिगृ
ह्य सनांते बध्ना। कृष्यै त्वा सुसस्यायै। तयां त वेदिलोष्टमुद्धंति। सुपिप्पला

२६ गं

भ्यस्त्वौषधीभ्यः। तथा दक्षिणं गोदानं कंडूयते। इति परस्तात्प्रत्यावसनांतेन शृंगं कुं
बध्वा। एतेन कंडूयस्व। अध्वर्युः स्वपरस्ताद्देवो वनस्पतिः। यजमानायास्य सम्मि
तमूर्ध्वां श्रमोदुंबरं दंडं प्रयच्छति। यजमानमूर्ध्वोमांहृद्योहृद्वः इति गृह्णाति। ण
स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्यां स्वाहोरोरंतरिक्षात्स्वाहा यज्ञं वाता
दारभे। यजमानं वाचयति। यजमानो मुष्टी कृत्वा वाचंयच्छत्यानक्षत्रोदया
त। अध्वर्युः आहवनीयाग्रे तिष्ठन् त्रिरुपांशु॥ ॥अदीक्षिष्टायं ब्राह्मणोनी
लकंठशर्मा पाराशरगोत्रोऽनंतशर्मणः पुत्रो रामभद्रशर्मणः पौत्रो नृसिंहश
र्मणो नप्तात्मिंद्रायेंद्राग्निभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्रा २६

ह्मणेभ्यश्च सोमपेभ्यः प्रब्रूमः। बर्हिर्निष्क्रम्य त्रिरुच्चैः।ए। दीक्षितोसि दीक्षितवा
द्वैव दसत्यमेव वदमानस्तं मास्माच्छियाग्रमाकंडूयया मापाष्ठया यदि स्मयाः सा अपि
गृह्य स्मयासै यदि कंडूयासै कृष्णविषाणया कंडूयासै यदि वाचं विसृजेद्वैष्णवीमृ
चमनुद्रवतान्मात्वान्यत्रे दीक्षितविमितात्सूर्योभ्युदियान्माभिनिम्रुक्ताद्यानि देव
तानामानि यथाख्यातं तान्याचक्षाथ यथान्यदेवतानामानि यथाख्यातं तान्याच
क्षाणउपरिष्टाद्विचक्षणं धेह्नि चनसितवतीं विचक्षणवतीं वाचं वदकृष्णाजिनान्मा
च्यवध्वंत्ति दंडाच्च। यजमानं संशास्ति। यजमानः यथोक्तं करोति। विश्वेदेवा अ
भिमामावर्वृत्रन्पूषा संन्या सोमो राधसा देवः सविता वसोर्वसुदावा। अप्रत्याख्या

यिनंप्रतिसनीहारान्प्रहिणोति। रास्वेयत्सोमाभूयोभरमापृणन्पूर्त्याविराधिमाहमा
मुषा। धनमाहरंतंहस्तान्नपति। चंद्रमसिममभोगायभव। तद्धिरण्यंरजतंवाप्रति
गृह्णाति। वस्त्रमसिममभो०व। वस्त्रं। उस्रासि म०व। गां। हयोसिम०व। अश्वं। छागो
सि०व। छागं। मेषोसि०व। मेषं। प्राजापत्यमसि०व। अध्वर्युः। उदुदयनवेलायामुत्तरे
णाहवनीयंतिष्ठन्। अग्नीज्योतिष्मतः कुरुतदीक्षितवाचंयच्छपत्निवाचंयच्छ। पू
र्वयाद्वारोपनिष्क्रम्यचतुस्तनंदोहयित्वा। जघनेनगार्हपत्यमुपविश्योद्दीप्तांगारानि
रुह्याधिश्रित्याभिद्योत्यस्रुवेणायः प्रत्यानीयपुनरभिद्योत्यत्रिः पर्यग्निकृत्वामेक्षणे
नालोड्यश्रपयित्वोदगुद्वास्यप्रत्यूह्यांगारानुत्तरेणशालाखंडेशिक्यआसजति। २१

प्रतिप्रस्थातादक्षिणयाद्वारोपनिष्क्रम्यपत्नीव्रतंदोहयित्वान्वाहार्यपचनेश्रपयित्वा
दक्षिणेशालाखंडेशिक्यआसजति। यजमानउदितेषुनक्षत्रेषुदंडकृष्णाजिनेस
मादायपूर्वयाद्वारोपनिष्क्रम्याग्रेणशालांतिष्ठन्। भूर्भुवःस्वरितिसकृदुपांशूक्त्वा
व्रतंकृणुतेतित्रिरुच्चैर्वाचंविसृजते। अब्दृंहमनोदरिद्रंचक्षुःसूर्योज्योतिषांश्रेष्ठो
दीक्षेमामाहासीः। दिवाअमेध्यदर्शनेसूर्यमुपतिष्ठते। रात्रावाहवनीयं। उंदतीर्बलं
धत्तौजोधत्तबलंधत्तमामेदीक्षांमातपोनिर्वधिष्ट। अभिरक्ष्योभिरक्ष्यमाणोवाज
पति। अनृतवदनेइमंमेवरुणतत्त्वायामित्वन्नोअग्नेसत्वन्नोअग्नइतिचतस्रः।
दंडकृष्णाजिनव्यवच्छेदे। देवाञ्जनमगन्यज्ञस्ततोमायज्ञस्याशास्वस्तुवर्धतां। भूति

दृष्ट्वाघृतेनसंवत्तयज्ञोयज्ञपतिम॰ दस॰ ॥ असंस्कृतपयपानेद्धिविस्तनाद्यतिक्रमे ऽ
प ॥ आचम्य। शिवाः पीताभवथयूयमापोस्माकंयोनावुदरेसुशेवाः। इरावतीरनमीवा
अनागसः स्वस्तिनोभवथजीवसे। वमनेष्ठीवनेवा। यदत्रापिरसस्यमेनिरष्ठविषु
मस्यतः ॥ अग्निष्टसोमः पृथिवीपुनरात्मन्दधातुमे। रेतःस्कंदने। यन्मेरेतःपरितो
षात्तदर्पय। अग्निहोत्रमिवसोमेनतदहंपुनराददे। इमंमेवरुणतत्वायामीतिस्व
वाहुतीर्जुहोति। स्वनंकरिष्यन्पुरीषंवापृथिव्यांलोष्टमादत्ते। इयंतेयज्ञियातनूः। करो
ति। अपोमुंचामिनप्रजाम॰ होमुचः स्वाहाकृताः पृथिवीमाविशत। लोष्टंप्रतिनि
दधाति। पृथिव्यासंभव। अश्रुपाते। बीभत्सानामापस्थस्वाहाकृताः पृथिवीमा

विशत। कफेनिर्गते। कफः स्यानामापः स्थस्वाहाकृताः पृथिवीमाविशत। स्वेदे। तपस्या
नामापस्थस्वाहाकृताः ०ता। दुःस्वप्नंदृष्ट्वोत्थायाहवनीयमेत्य ० दुःस्वप्नपापस्वप्नो
पभुक्तैर्बह्वाद्मंतरंकरवैर्नह्निस्वप्नमुपश्यथत। स्वप्नेन्नभेरजने। यदन्नमद्यतेनत्तं
नत्वातः क्षुधोवरति। सर्वंतदस्मान्माहिंसीर्नहितदहृदरोदिवा। स्वदेहेलोहितमुत्प
तितंदृष्ट्वाकंडूयनं। नमोरुद्रियात्तभ्योद्भः स्वाहा। यदिवर्षतिधावेत। नमोरुद्रायवा
स्तोष्पतये आयनेविद्रवणेउद्यानेयत्परायणे। आवर्तनेविवर्तनेयोगोपायति
तंहुवे। दाक्षितांतेरणसमागमे। कृयानं ० हता। देवयजनादन्यत्रसूर्योदयास्तम
ययोः। सूर्योमादेवोदेवेभ्यः पातुवायुरंतरिक्षाद्यजमानोऽग्निर्मापातुचक्षुषः। सक्ष

श्च सवितर्विश्वचर्षणे एतेभिः सोम नामभिर्विधेम ते। अवांतरदीक्षाविसर्गादेतानि
प्रायश्चित्तानि। शयिष्यमाणः स्वायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमास्तीर्य
।१०। अग्ने त्वं सु जागृहि वयं सु मंदिषीमहि। गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः।
शेते। पत्नी जघनेन गार्हपत्यं संविशति तूष्णीं। अध्वर्युः मध्यरात्रे यजमानं प्रबुध्य
जुर्वाचयति। त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः। यजमानो व्रतयिष्य
न्नप आचामति। दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसं सुपा
रा नो असद्वशे। अध्वर्युणा दत्तं व्रतं स्वायतने कंसेन परिश्रित्य व्रतयति। ये देवा म
नोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा। १९

आचम्य जपति। शिवाः० जीवसे। प्रतिप्रस्थात्रा दत्तं व्रतं पत्नी परिश्रित्य तूष्णीं व्रत
यति निर्णिज्य पात्रे प्रयच्छतः। अध्वर्युः अपररात्रे प्रेष्यति त्रिस्तनव्रतं दोहयता
ग्नीनुपोतिष्ठतः। कुरुत व्रत्यवान्वयं यच्छ पत्नि वाचं यच्छ। उभौ। तथैव दोहयित्वा शि
क्य असजेतः। देशमेव व्रतं पत्न्याः। यजमान। उदित आदित्ये अग्रेण शालां द्वा
र्यां तिष्ठन् भूर्भुवः सुवः व्रतं कृणुत। व्रतं कृणुत। अध्वर्युः एहि यजमान। पूर्वया द्वारा
शालां प्रपाद्य। यजमानः प्रायणीयेष्ट्यायक्ष्ये। पथ्यास्वस्तिरग्निः सोमः सविता दि
तिश्च प्रधानदेवताः चतस्र आज्यहविषः अदित्यै चरुः पंच प्रयाजाः प्रधानमुपां
शु इत्यादि। इदमादि मैत्रावरुण्यंतं नान्वाधानादि। अध्वर्युः असिदादानादि पात्र

२०

तं चरोः पयसि श्रपणे पयः। प्रलोथ्याभियश्योगांते गार्हपत्ये स्मार्त्तेवदाज्यं संस्कृत्या
हवनीये स्रुवाहुतिं जुहोति। कविर्यज्ञस्य वितनोति पंथां नाकस्य पृष्ठे अधिरोचने दिवः।
येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान् त्वा हा० कवये अग्नय इदं। उप
निष्क्रम्य संप्रेष्यति० सोमविक्रयिन् सोमं शोधय शोधयोपरवाणां काले रोहिते चर्मण्यान
डुहे पांमते ब्राह्मणो दक्षिणेन आस्तीर्य तां गावोदूरं मागुर्यास्तु सोमक्रयणी च सोमवा
हनावनेडु। हो सोमवाहनमनः प्रक्षालयतो हुतफलकं। यथासंप्रैषं ते कुर्वंति। ध्व
स्यादानादि चरुकल्पेन चरुं श्रपयित्वा सूर्यं तदिति षट्टोत्रां तर्वेद्यासाद्य प्रयाजशेषे
ण पंचकृत्वो ध्रुवामभिघार्य चरू प्रभृतौ। आज्यभागाविष्ट्वाग्नि षूवा ध्रुवाज्याच्चेतु २०

गृहीतैः प्राग्दादिषु पथ्यास्वस्त्यादीनुपांशु यजति। दद्भिरनुमंत्रणं। चरुणा मध्ये दितिं य
जति अन्नादोनुमंत्रणं। अदितिमिष्ट्वा मारुतीमृचमन्वाह। मरुतो यद्ध वो दिवः सुम्नायं
तो हवामहे। आतूनउपगंतन। स्विष्टकृत उपस्तीर्य चतुर्ध्रुवाज्यात्सकृच्चरोरुत्तरार्द्धा
द्ववदाय द्विरभिघार्य मेक्षणं स्रुचोरधोनीत्वाग्नीध्रेय प्रयच्छन्नाह। अतिवालयता दे
वमानुप्राशावीः। स्विष्टकृता प्रचर्य अग्नीधा मेक्षणे ध्यग्निप्राङ्नीत्वा भुवि स्थोत्तरतः
सादिते संक्षालनादि। प्राशित्रमवदाय इडायामुपस्तीर्य ध्रुवाज्यादष्टकृत्वो द्विरवरो व
दायाभिघारयति। हविरुच्छिष्टमृत्विक्स्य परिकर्मिणः संप्रेष्यति। १४। अनुच्छिष्टी
कुर्वंतएतं चरुं व्युद्धृत्य प्राश्नीतायैतां चरुस्थालीं१५ सक्षामकाषामेतन्मेक्षणमेतं वेद

मेतद्वर्हिश्चतुष्टयमुदयनीयायनिधत्तात्।तेनप्राकुर्वंति।स्रुग्विमोकांतेपत्नीमंत
र्वेदिप्रणीतानिनीयपत्नींध्रुवामाप्याय्यतत्तश्चतुर्गृहीतंगृहीत्वास्रुवेहिरण्यंनिधायै
कस्यादर्भमुसलेप्रग्रथ्यजुहामवदधाति।इयंतेशुक्रतनूरिदंवर्चस्तयासंभवभ्राजं
गच्छ।अन्वारब्धेयजमाने।जूरसिधृतामनसाजुष्टाविष्णवेतस्यास्तेसत्यसवसः
प्रसवेवाचोयंत्रमशीयस्वाहा।सोमक्रयण्याइदं०अपरंचतुर्गृहीतंगृहीत्वा।
स्फ्यमुदपात्रंबर्हिर्हिरण्यमादाय।एहियजमान।यद्धरणीहस्तयापत्न्यानुगते
नयजमानेनसहपूर्वयाद्वारोपनिष्क्रम्य।अग्रेणशालांतिष्ठंश्चतुर्गृहीतंयज
मानमवेक्षयति।शुक्रमस्यमृतमसिवैश्वदेवꣳहविः।हिरण्यमंतर्धायादित्यमु

दीक्षयति।सूर्यस्यचक्षुरारुहमग्नेरक्ष्णःकनीनिकांयदेतशेभिरीयसेभ्राजमानोविपश्चि
ता:सोमक्रयणीमग्रेणशालांपद्ययायामुदीचीमनुमंत्रयते।विदसिमनासिधीरसिद
क्षिणासियज्ञियासिक्षत्रियास्यदितिरस्युभयतःशीर्ष्णीसानःसुप्राचीसुप्रतीचीसं
भवमित्रस्त्वापदिबध्नातुपूषाध्वनःपात्विंद्रायाध्यक्षायानुत्वामातामन्यतामनु
पितानुभ्रातासगर्भ्योनुसखासयूथ्यःसादेविदेवमच्छेहींद्रायसोमꣳरुद्रस्त्वाव
र्तयतुमित्रस्यपथास्वस्तिसोमसखापुनरेहिसहरय्या।प्रेष्यती।दक्षिणस्येर्मस्य
सप्तमंपदंजोषयध्वं।तस्याउदङ्नीयमानायादक्षिणस्यदोष्णःषट्पदान्यनु
निष्क्रामतिषड्भिः।वस्व्यसि।रुद्रासि।अदितिरसि।आदित्यासि।शुक्रासिचंद्रासि।

सप्तमं दक्षिणेन गृह्णाति। बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिरा चिकेतु। पदे हिरण्यं निधा
य परिस्तीर्य परिषिच्य। पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजने इडायाः पदे घृतवति स्वा
हा। चतुर्गृहीतं जुहोति। सोमक्रयण्या इदं। हिरण्यमपनीय परिलिखति। परिलिखितꣳ रक्षः प
रिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्वि
ष्म इदमस्य ग्रीवा अपिकृन्तामि। स्फ्येन पदं परिलिखति। सकृन्मंत्रेण हिरण्यहस्तो।
अपउपस्पृश्य। स्फ्येनोपसंगृह्य पदं रण्यां संवपति। अस्मे रायः। मंत्रकर्मणोस्त्रि
रावृत्तिः। त्वे रायः। पदं रण्यां यजमानाय प्रयच्छति। यजमान। तोते रायः। पत्न्यै प्रयच्छति।
संदेवि देव्योर्वश्या पश्यस्व। पत्नी सोमक्रयण्या समीक्षयति। पत्नी। त्वष्टीमती ते सपे

यसुरेता रेतो दधाना वीरं विदेय तव संदृशि। यजमानमीक्षते। यजमानः। माहꣳ राय
स्पोषेण वियोषं। सोमक्रयणीं। अध्वर्युः हिरण्यं बध्वाध्यमध्यमायामंगुलौ बध्वा।
पदं देशोदकमुपनिनीय पत्नीं गमयित्वा। १५। तत्रैव चंद्रं छागां कृष्णावलक्ष्यापू
र्णास्तके उपस्तीर्य वाससि कृष्णाजिने सोमक्रयणीमादायोपरवदेशं गत्वा। सोमवि
क्रयिन् शोधय इत्युक्ते सोमाः। उ। सः। शुद्धः। यजमानः। एष ते गायत्रो भाग इति मे सोमाय
ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रू
ताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतात्। सुविचितं राजानमुपस्थाय। अ
ध्वर्युः द्विगुणं वासः प्रवर्मन उत्तरार्धे वा दशमाः स्तीर्य। अꣳशुना ते अꣳशुः पृच्यतां

परुषापरुर्गंधस्तेकाममवतुमदायरसोअच्युतोमात्योशुक्रस्तेग्रहः।सहिरण्येन
पाणिनाराजानमभिमृश्य।अभित्यंदेवꣳसवितारमुण्योःकविक्रतुमर्चामिसत्य
सवसꣳरत्नधाममभिप्रियंमतिंमूर्धायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपा
णिरमिमीतसुक्रतुःकृपा॰स्वः।पंचमुष्टीर्मंत्रावृत्त्यासांगुष्ठयाप्रदेशिन्योपकनि
ष्ठिकयाप्रदेशिन्यान्याकनिष्ठिकयामध्यमयेतिविमाय।कनिष्ठयामध्यमयाक
निष्ठयाप्रदेशिन्यामस्नानाम्न्यात्र्यंस्रीपंचमुष्टीर्विमाय।दशाकृत्वोमिमानोर्द्धमेव
मिनोति।प्रजाभ्यस्त्वा।शिष्टंमितेप्रक्षिप्य।वसनांतानेकीकृत्य।प्राणायत्वा।प्रद
क्षिणमुष्टीषेणावेष्टयित्वा।व्यानायत्वा।अंताउपरुह्य।अंगुल्यावकाशंकृत्वा।प्र २३

जास्त्वमनुप्राणिहिप्रजास्त्वामनुप्राणंतु।यजमानमवेक्षयित्वा।चर्मणिनिधायसो
मविक्रयिणोयाते।अग्निरभ्युक्षचर्मोदूह्यौल्छाय।सोमविक्रयिन्क्रय्यस्तेसोमाः३।
सः।क्रय्यः।अध्वर्युःमृडंवत्ताः३सः।मृडंवत्तोहि।अध्वर्युः।गवातेक्रीणामि।सोमक्र
यण्यासोमंपणते।सः।क्रीतःसोमः।वयांसिव्याचक्ष्व।अध्वर्युः।एषातेसोमक्रयणी
चंद्रंतेछागातेवस्त्रंते।२६।सोमंतेक्रीणाम्यूर्जस्वंतंपयस्वंतंवीर्यावंतमभिमाति
षाहꣳशुक्रंतेशुक्रेणक्रीणामिचंद्रंचंद्रेणामृतममृतेनसम्यतेगोः।कौसायद्धिरण्यं
दर्शयित्वा।अस्मेचंद्राणि।यजमानायप्रदाय।तपसस्तनुरसिप्रजापतेर्वर्णस्तस्या
स्तेसहस्रपोषंपुष्यंत्याश्चरमेणपशुनाक्रीणामि।प्रतीचीनग्रीवयाजयाराजानंप

णाने। अस्मेतेबंधुः। यजमानंसमीक्ष्य। मयितेरायःश्रयंतां। आत्मानं अजां प्रदक्षिण
मावर्त्याभ्युपेत्य उदीचींकौत्सायदत्वा। मित्रोनएहिसुमित्रधाः। राजानमादाय। ब्रह्मा।
इंद्रस्योरुमाविशदक्षिणमुशन्नुशंतं स्योनः स्योनं। यजमानस्यदक्षिणोरौसादयति।
अध्वर्युः। वयःसुपर्णाउप॰बद्धान्। यजमानस्यकृष्णविषाणयोष्णीषमपनयति।
यजमानः। अभ्युत्थ्यकौत्सायपरिक्रमिणेयोष्णीषंप्रदायमैत्रावरुणायदंडंप्रयच्छति।
मैत्रावरुणदंडेध्वर्युर्यजमानंवाचयति। त्वांगावोवृणतराज्यायत्वां हवंतमरुतःस्व
र्काः। वर्ष्मन्क्षत्रस्यककुभिःशिश्रियाणस्ततोनउग्रोविभजावसूनीइति। मित्रावरु
णयोस्त्वाप्रशास्त्रोःप्रशिषाप्रयच्छामि। अध्वर्युः। अस्मेजोतिः। शुक्रोणिक्कांय २५

जमानेध्यस्य। इदमहं सर्पाणांदंदशूकानांग्रीवाउपग्रथ्नामि। कृष्णाउपग्रथ्य। सोम
विक्रयिणितमः। तयासोमविक्रयिणं अभ्यवेर्विध्यति। सोमक्रयणानन्नुदिशति। स्वा
नभ्राजांघारेबंभारेहस्तसुहस्तकृशानवेतेवःसोमक्रयणास्तान्रक्षध्वंमावोदभ
न्। उदकुंभमुपप्रवर्त्य। यजमानः। उदायुषास्वा॰अनुराजानमादायोपोत्थायरा
जानंशिरसिनिधायउर्वंतरिक्षमन्विहि। दक्षिणतःप्राङ्मुखमनोभ्येति। अध्वर्युः
अदित्याःसदोसि। नीडेकृष्णाजिनमास्तृणाति। यजमानः। अदित्याःसदआसीद।
कृष्णाजिनेराजानंनिधाय। उभौ। अस्तभ्नाद्द्यामृषभोअंतरिक्षममिमीतवरिमा
णंपृथिव्याआसीदद्विश्वाभुवनानिसम्राड्विश्वेत्तानिवरुणस्यव्रतानि। राजानमु

प्रतिष्ठेते। अध्वर्युः। वनेषु व्यंतरिक्षं ततान वाजमर्वत्सु पय उस्रियासु। हृत्सु क्रतुं वरुणो
विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्राविति राजानं प्राग्वंशे वाससा वेष्टयित्वा। उदु त्यं जा॰
र्ये। कृष्णाजिनमंतर्लोमोर्ध्वग्रीवं पुरस्ताद्दधा। उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्र
ह्मचोदनौ। सोमवाहनावानीयमानौ प्रतिमंत्र्य। वरुणस्य स्कंभनमसि। दक्षिणं युक्त्वा।
वरुणस्य स्कंभसर्जनमसि। शम्यामवगुह्य। प्रत्यस्तो वरुणस्य पाशः। योक्त्रं। एवमुत्त
रमनड्वाहं युक्त्वा दक्षिणामिषां मन्वारभ्य संप्रैषमाह। सोमाय क्रीताय प्रोह्यमाणा
यानुब्रूहि सुब्रह्मण्य सुब्रह्मण्यामाह्वय मा त्वमाह्वार्यजमान आह्वास्यति। य
जमानेः। अंतरेणेषे तिष्ठन्पलाशशाखां धारयन्सुब्रह्मण्योम् इति त्रिरुपांश्वाह्वय २५

ति। सुब्रह्मण्येनाहूतायां प्रथमायामृचि त्रिरुक्तायां। प्रच्यवस्व भुवस्पते विश्वान्य
भिधामानि मा त्वा परिपरी विदन्मा त्वा परिपंथिनो विदन्मा त्वा वृका अघायवो मा
गंधर्वो विश्वावसुरा दघच्छ्येनो भूत्वा परापत यजमानस्य नो गृहे देवैः संस्कृतं। अनः
प्रच्याव्य। दक्षिणामुखं परिवर्त्य परिवहंति। अध्वर्योरेव मंत्रः। अध्वर्युयजमानौ। यज
मानस्य स्वस्त्ययन्यस्यपि पंथामगस्महि स्वस्तिगामनेहसं येन विश्वाः परि द्विषो वृण
क्ति विंदते वसु। अंतःसाप्रतीचीमागत्य। अध्वर्युः प्रीढीनरत्नीराजासंदीं गृहीत्वा। न
मो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पु
त्राय सूर्याय शंसत। अग्रेणशालां तिष्ठन्नोह्यमानं राजानं प्रतिमंत्र्य। अग्रेण ग्रा

२६

शामुदग्नीध्रमनउपस्थाप्य। वरुणस्यस्कंभनमसि। उपस्तंभनेस्थापयित्वा। वरुणस्यस्कं
भसर्जनमसि। दक्षिणस्यानडुहःशम्यामुत्कृष्य। उन्मुक्तोवरुणस्यपाशः। योक्त्रं। ए
हियजमान। पूर्वयाद्वाराशालांप्रपाद्य। यजमानः। आतिथ्येष्ट्यायक्ष्ये। अग्नीषोमावा
ज्यभागौ। वैष्णवोनवकपालःपुरोडाशः। नानुयाजाःप्रधानमुपांशु। अध्वर्युःअसिदा
दानादि। अश्ववालांप्रस्तरः। ऐक्षवीविधृती। पंचविधंबर्हिः। कार्ष्मर्यमयाःपरिधयः
ततस्त्वांद्वाविंशतिधा। उपस्थानव्रीहीन्निर्वपत्यन्वारब्धायांपत्न्यांपंचकृत्वोयजुषा।
देवस्यत्वा० मग्नेरातिथ्यमसिविष्णवेत्वाजुष्टंनिर्वपामि। देवस्य० भ्यां० सोमस्याति
थ्यमसिवि० मि। देव० भ्यामतिथेरातिथ्यमसिवि० मि। देव० भ्यामग्नयेत्वारायस्पो २६

षदाव्न्नेवि० मि। देवभ्यां० श्येनायत्वासोमभृतेविष्णवेत्वाजुष्टंनिर्वपामि। इदंदेवानामि
त्यादि। तंडुलायोनिनीयदक्षिणावङ्कुत्तरमनड्वाहंविमुच्य। चत्वारोब्राह्मणाआसंदींशा
लांप्रवेशयंति। यजमानः। यातेधामानिहविषायजंतिताते विश्वापरिभूरस्तुयज्ञं।
राजानमादाय। गयस्फानःप्रतरणःसुवीरोवीरहाप्रचरासोमदुर्यान्। शालांप्र
पाद्य। आसंदींसोमंचांतरेणवेद्युल्केखेनीत्वाग्रेणाहवनीयंपर्याणीयदक्षिणतआ
संद्यामध्वर्युःकृष्णाजिनमास्तृणाति। अदित्याःसदोसि। यजमानः। अदित्याः
सदआसीद। कृष्णाजिनेराजानं। वरुणोसिधृतव्रतोवारुणमसि। राजानमुप
स्थाय। अध्वर्युःशंयोर्देवानांसख्यात्। कृष्णाजिनांतानेकीकृत्यरज्ज्वावंशेप्रग्र

थ्या। मादेवानामपसश्छिरमादि। आसंद्या अपरपादयोर्मध्ये राजा पादौ वक्षालया
मीति ध्यायंस्त्वंजलिना जलमासिच्य। शतं दक्षिणौ क्षालयति। यजमानः उपति
ष्ठते। तत्त्वायामि ब्रह्मणा ०भीः। अध्वर्युः माराजानं चाहवनीयं चांतरेण कृष्णः संचा
रिणैन इ सायुधोमासदं डोमा सच्छचोमासोत्की षोमा साधस्याद्योनुप्रपादीत्।
यजमानो राजानं मधुपर्केणाह्रयति। निवेदितां गामध्वर्युः कृतं तेति वदति।
।२१। अध्वर्युः कृष्णाजिनावधूननादि। विस्तोमे वोत्तरे युगमयेत्। पुरोडाशाम
धिश्रित्य गार्हपत्ये मदंती रधिश्रीत्याज्यनिर्वपादि चतुर्गृहीतान्याज्यानि।
चतुर्होत्रातिथ्यमासादयति। पृथिवी होता। अमन्त्राभिमंत्रेण कृष्णे संभारा (२१)

न्याचष्टो। अग्निर्यजुर्भिः। सविता स्तोमैः। इंद्र उक्थामदैः। मित्रावरुणावाशिषा।
अंगिरसो धिष्ण्यैरग्निभिः। मरुतः सदोहविर्धानाभ्यां। आपः प्रोक्षणीभिः। ओष
धयो बर्हिषा। अदितिर्वेद्या। सोमो दीक्षया। त्वष्टेध्मेन। विष्णुर्यज्ञेन। वसव आज्येन।
आदित्या दक्षिणाभिः। विश्वेदेवा उर्जा। पूषा स्वगाकारेण। बृहस्पतिः पुरोधया।
प्रजापतिरुद्गीथेन। अंतरिक्षं पवित्रेण। वायुः पात्रैः। अहं श्रद्धया। उत्करे कृ
ष्णाजिनमास्तीर्य। अग्नेर्जनित्रमित्यादि पशुवन्निर्मथ्येन प्रचर्याभिजुहुयात्। अग्न
ये समिध्यमानायेत्या। न समिधं परिशिनष्टि। चतुर्थे सर्वमौपभृतं जुहूमानीय।
प्रयाजशेषेण ध्रुवां पुरोडाशमभिघार्यनोपभृतं। आज्यभागाविष्टोपांशु प्रथा

नेनप्रचर्यशिपिविष्टेत्यन्वादेनवानुमंत्रितेस्विष्टकृदिडेनप्रचर्यमार्जयित्वाप्राशित्रं
परिहृत्यातिथ्यः संतिष्ठते॥ तस्मीन्प्रणीतानिनीयतस्मीन्ध्रुवामाप्याय्यवेद्यांकंसंच
मसंवानिधायध्रौवंपंचकृत्वोगृह्णामि। आपतयेत्वागृह्णामि। परिपतयेत्वागृह्णा
मि। तनूनप्त्रेत्वागृह्णामि। शाक्वरायत्वागृह्णामि। शक्मन्नोजिष्ठायत्वागृह्णामि।
यजमानांत्वाहृत्विजस्तमवमृशंतिमुख्यक्रमेण। अनाधृष्टमस्यनाधृष्यंदेवा
नामोजोभिशस्तिपा अनभिशस्तेन्यं। अध्वर्युःयजमानंवाचयति। अनुमेदीक्षां
दीक्षापतिर्मन्यतामनुतपस्तपस्पतिरंजसासत्यमुपगेषंस्वितेमाधाः। यजमा २८
नःप्रथमादिक्रमेणाध्वर्य्यादीन्सर्वानुपहूयतानूनप्त्रंत्रिरवजिघ्रति। प्रजापतौ

त्वामनसिजुहोमि। सकृन्मंत्रेणद्विस्तूष्णीं। अथैनदद्भिःसंस्पृश्यचालोत्तरेनिनय
ति। अध्वर्युः अग्नीन्मदंत्यापः३। अग्नीध्रः। मदंतिदेवीरमृताऋतावृधः। अध्वर्युः। ताभि
र्वायजमानोवा। प्रथमादिक्रमेणमदंतीरुपस्पृश्योपोत्थायविस्रस्यहिरण्यम
वधायराजानमाप्याययंति। अंशुरंशुस्तेदेवसोमाप्यायतामिंद्रायैकधनविद
आतुभ्यमिंद्रःप्यायतामात्वमिंद्रायप्यायस्वा यजमानंवाचयति। आप्या
ययसखीन्त्सन्यामेधयास्वस्तितेदेवसोमसुत्यामशीय। मदंतीरपःस्पृष्ट्वायथा
यतनमुपविश्य। अध्वर्युरेवाज्यवतीभ्यांस्रुचौव्यूह्यपरिधीन्त्समज्यपयथायत
नंस्रुचौसादयित्वाविधृतीभ्यांसदप्रस्तरंगृहीत्वाऽप्रतिश्रणांस्त्रेधानत्कि। अतः

रिद्याणाइत्यादिनप्रस्तराश्रावयतिनबर्हिरनुप्रहरति।प्रस्तरंदक्षिणार्द्धेवेद्यैनिधा
यतस्मिन्दक्षिणोत्तरिणोनिह्नुवते।एष्ठारायःप्रेषेभगायर्तमृतवादिभ्योनमोदिवे
नमःपृथिव्यै।आतिथ्याबर्हिषएकदेशंविधृतीभ्यांसहतमेवप्रस्तरंसंदधा
तेष्वेवपरिधिष्वेकादशसमिधःकृत्वानुपसंगृह्यतदुभयमाहवनीयेतिवाप्याग्नि
रच्युतश्रोत्तरतःसादयित्वा।यजमानमाहअवतांतरदीक्षांगृहाण।यजमानःअ
हवनियममुपतिष्ठते।अग्नेव्रतपतेत्वंव्रतानांव्रतपतिरसियाममतनूरेषासात्वयि
यातवतनूरियंसामयिसहनौव्रतपतेव्रतिनोर्व्रतानि।अध्वर्युःयजमानंसंशास्ति।
संतरांमेखलांसमायच्छस्वसंतरांमुष्टीकुरुष्वतत्त्वव्रतएधिमदंतीभिर्मार्जयस्त्वो २९

त्तर्ववितनंरुडो।यातेअग्नेरुद्रियातनूस्तयानःपाहितस्यास्तेस्वाहेत्येतेनातोधि
व्रतया।सएवमेतत्सर्वंकरोति।१८।इतिप्रथमप्रश्नः।ए।होत्रेध्वर्युब्रह्मप्रतिप्रस्था
तृप्रस्तोत्रग्नीध्रयजमाननमोवाचइतिशांतिंपठंति।अध्वर्युर्गार्हपत्यस्यपुरस्ताल्ल
लोषुसंभाराडासंदीरुक्मणांगोदोहनीछागायैशंकुराफोपयमनंस्रुवंरौहिणद
वन्योद्वेधृष्णीचौलिधविनीलिषट्छकलानेतान्यौदुंबराणिवैकंकतीसमिधं
त्रयोदशवैकंकतान्परिधीवैकंकतीप्रचरणीकार्श्मर्यमयान्परिधीन्सुवर्णराजतौ
रुक्मौद्वेघर्मदुघेधेनुंछागांचबर्हिःस्थापयित्वाद्वौकुशमयौवेदौएकंमौंजमप
रिवासितंमौंजंरज्जुदामसुंतप्रलवानरौहिणपिष्टानिसिक्ताश्चासाद्योतरेण

गार्हपत्याहवनीयौ खरौ कृत्वा उत्तरेण लांखंडे तथैव चतुरस्रमुदङ्निष्यंदनवंतमुछ्रि
छ्रखरं कृत्वा प्रचरणीयं महावीरं शफाभ्यां परिगृह्य प्रवृंजनीये खरे सादयित्वा मौंजे
न वेदेनापिधाय दक्षिणतः आहवनीयस्य सम्राण्न्यसंधां कृष्णाजिने प्राग्बिलौ उपय
मौ महावीरौ वेदाभ्यां परिगृह्य अभ्रिं शिष्टां मृदं चासाधस्थूणां शंकुं चादाय जघने
न गार्हपत्यं परीत्य दक्षिणया द्वारोपनिष्क्रम्य होतुः संदर्शे स्थूणां निहत्य मौंजेन दाम्ना
घर्मदुघो वत्सं बध्वोत्तरतः शंकौ छागां बध्वा पत्नीं होतारं ब्राह्मणं प्रतिप्रस्थातारं प्र
स्तोतारं अग्नीध्रं प्रवर्ग्यकर्तृन्नाहूय द्वाराणि परिश्रित्य पत्नीशाले पत्नीमुपवेश्य
परिश्रित्याग्नीन्परिस्तीर्य गार्हपत्यस्य दक्षिणतो ब्रह्मयजमानावुपवेश्य सपवित्रा ३०

यां प्रचरण्यां मदंतीरानीयोत्पूयादधान आस्ते। ब्रह्मन्प्रवर्ग्येण प्रचरिष्यामो होतर्घ
र्ममभिष्टुहि अग्नीध्रौहिणौ पुरोडाशावधिश्रय प्रतिप्रस्थातः प्रवर्ग्यं विहर प्रस्तोतः सामा
नि गाय। प्रस्तुतः प्रचरणीयं महावीरं प्रोक्षति। यमाय त्वा मखाय त्वा सूर्यस्य हरसे त्वा।
अभिपातुकान्परान्परान्संभारान्। प्रतिप्रस्थाता प्रोक्षितं मन्यत्र स्थापयत्यध्वर्युः आ
हवनीये काश्मर्यमयान्परिधीन्परिधाय तत्रौदुंबरान्छकलान्वैकंकतीं समिधं च सा
दयित्वा गार्हपत्ये त्रयोदश वैकंकतान्परिधीन्सुवर्णरजतौ रुक्मौ मुंजप्रलवान्रौहिण
पिष्टानि सादयति। अग्नीध्रः जघनेन गार्हपत्यं धृष्टीभ्यां प्रतीचोंगारान्निरूह्य रौहि
णकपाले उपधाय मदंतीभिः पिष्टानि संयुत्य पिंडीकपालयोरधिश्रित्य स्थाल्यामा

ज्यंतिरः पवित्रमानियाघेश्रित्योभयंपर्यग्निकृत्वारौहिणौपुरोडाशौश्रपयति। प्रति
प्रस्थाताभौंजवेदाग्रेणमहावीरंस्तुवंपिन्वनेरौहिणहवन्यौउपयमनंचसम्रड्याउपमु
त्ययरौहिणौपुरोडाशावुपस्तीर्णाभिघारितावुद्यास्यरौहिणहवनीभ्यांपरिगृह्यवेद्या
मासादयति। दक्षिणंपरिधिसंधिमनुदक्षिणमुत्तरंपरिधिसंधिमन्वितरं। प्रांचौप्र
वीक्षिकेपर्त्यंचावापराह्णिके। अध्वर्युःप्रचरणीयंमहावीरंशफाभ्यांसव्येगृहीत्वाआ
ज्यस्थाल्याःसकृदुपहत्यगार्हपत्येनवानंसंततासप्ताहुतीर्जुहोति। प्राणायस्वाहा।
व्यानायस्वाहा। पानायस्वाहा। चक्षुषेस्वाहा। श्रोत्रायस्वाहा। मनसेस्वाहा। वाचे
सरस्वत्यैस्वाहा। यथालिंगंत्यागः। चतस्रोयथोपपादं। दक्षायस्वाहा। क्रतवेस्वा ३१

हा। ओजसेस्वाहा। बलायस्वाहा। महावीरमाज्येनानक्ति। देवस्त्वासवितामध्वानक्तु। प्र
तिप्रस्थातारजतंरुक्मंप्रवृंज्यनीयेस्वरेउपगूहति। पृथिवीतपसस्त्रायस्व। अध्वर्यु
र्मुंजउपलवान्व्यतिषक्तान्आगुदगग्रान्प्रदक्षिणमादीपयति। अर्चिरसि। शोचि
रसि। ज्योतिरसि। तपोसि। तान्प्रवृंजनीयसंप्रकीर्यमहावीरंसादयति। सꣳसीद
स्वमहाꣳ असिशोचस्वदेववीतमः। विधूममग्ने अरुषंमियेध्यसृजप्रशस्तदर्श
तं। आज्येनपूरयति। अंजंतियंप्रथयंतोनविप्रावपावंतंनाग्निनातपंतः। पितुर्न
पुत्रउपसिप्रेष्ठआघर्मोअग्निमृतयन्नसादीत्। यजमानोमहावीरस्यप्रागाघूर्धी
तेषुप्रदक्षिणंपादेशांकरोति। मंत्रानध्वर्युश्च। अनाधृष्यापुरस्तादग्नेराधिपत्य

आयुर्मेदाः।पुत्रवतीर्दक्षिणतइंद्रस्याधिपत्येप्रजांमेदाः।सुषदापश्चाद्देवस्यसवितुरा
धिपत्येप्राणंमेदाः।आश्रुतिरुत्तरतोमित्रावरुणयोराधिपत्येश्रोत्रंमेदाः।विधृतिरुप
रिष्टाद्बृहस्पतेराधिपत्येब्रह्ममेदाः।क्षत्रंमेदास्तेजोमेधावर्चोमेधायशोमेधास्त
पोमेधामनोमेधाः।यजमानः।भूमिमभिमृशति।मनोरश्वासिभूरिपुत्राविश्वाभ्यो
मानाष्ट्राभ्यःपाहिसुपसदामेभूयामामाहिंसीः।अध्वर्युर्दक्षिणाभ्यामुदीचोंगारा
निरूहति।तपोष्वग्नेअंतरांअमित्रान्तपाशंसमररुषःपरस्य।तपावसोचिकि
तानोअचित्तान्वितेतिष्ठंतामजराअयासः।तैरेनंप्रदक्षिणंपरिचिनोति।चित
स्थपरिचितःस्वाहामरुद्भिःपरिश्रयस्व।दक्षिणतश्चोत्तरतश्चद्वौवैकंकतौपरि ३२

धीपरिदधाति।माअसि।माअसि।प्रतिप्रस्थातापश्चात्पुरस्तात्प्रोदगग्रौ।प्रमाअ
सि।प्रमाअसि।तथैवद्वावध्वर्युः।प्रतिमाअसिप्रतिमाअसि।द्वौप्रतिप्रस्थाता।
सम्माअसि२द्वावध्वर्युः।विमाअसि२द्वौप्रतिप्रस्थाता।उन्माअसि२अध्वर्युस्त्र
योदशंदक्षिणतऊर्ध्वाग्रमुच्छ्रयति।अंतरिक्षस्यांतर्धिरसि।सौवर्णरुक्मेणमहा
वीरमपिदधाति।दिवंतपसस्त्रायस्व।घर्ममुपतिष्ठते।अभिगीर्भिर्यदतोनऊनमा
प्याययहरिवोवर्धमानः।यदास्तोतृभ्योमहिगोत्रारुजासिभूयिष्ठभाजोअधते
स्याम।शुक्रंतेअन्यद्यजतंतेअन्यद्विषुरूपेअहनीद्यौरिवासि।विश्वाहिमाया
अवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु।अर्हन्बिभर्षिसायकानिधन्वार्हन्नि

३३

ष्कंयजतंविश्वरूपं।अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति।प्रज्वलितेरु
क्ममपकृष्यधवित्राण्यादत्ते।गायत्रमसि।एकं।त्रैष्टुभमसि।द्वितीयं।जागतमसि।
तृतीयं।तैरेनंपश्चात्प्राङ्‌जान्वाच्ययुगपद्भिरूर्ध्वंधुनोति।मधुमधुमधु।३।उत्तरतस्ति
ष्ठतेप्रतिप्रस्थात्रेद्वेधवित्रेप्रयच्छति।तयोरेकमग्नीधेप्रतिप्रस्थाता।प्रणवेप्रणवेधू
न्वंतोमहावीरंत्रिःप्रदक्षिणीकृत्योत्तरतस्तिष्ठते।अध्वर्युर्धवित्राण्यादायात्मनोपरे
णपरिक्रांतायोत्तरतस्तिष्ठते।प्रतिप्रस्थात्रेद्वेप्रयच्छति।एकमग्नीधेप्रतिप्रस्थाता।प
श्चात्प्राङ्मुखोध्वर्युरुपविशतिपुरस्तात्प्रत्यङ्मुखःप्रतिप्रस्थातोत्तरतऽग्नीध्रः
प्रणवेप्रणवेधून्वंतःस्रुवेणमहावीरमाप्याययंति।याभिर्वर्त्तिकामित्युपश्रुत्या ३३

ध्वर्युयजमानौमहावीरमुपोत्थायप्रेक्षतः।दशप्राचीर्दशभासिदक्षिणा।दशप्रती
चीर्दशभास्युदीचीः।दशोर्ध्वाभासिसुमनस्यमानः।सनोरुचंधेह्यहृणीयमानः।
अग्निष्ट्वावसुभिःपुरस्ताद्रोचयतुगायत्रेणछंदसा।समारुचितोरोचय।इंद्रस्त्वा
रुद्रैर्दक्षिणतोरोचयतुत्रैष्टुभेनछंदसा।समारु०।वरुणस्त्वादित्यैःपश्चाद्रोचयतु
जागतेनछंदसा।समारुचि०।द्युतानस्त्वामारुतोमरुद्भिरुत्तरतोरोचयत्वानुष्टुभे
नछंदसा।समारुचि०।बृहस्पतिस्त्वाविश्वैर्देवैरुपरिष्टाद्रोचयतुपाङ्क्तेनछंदसा।
समा०।रोचितस्त्वंदेवघर्मदेवेष्वसि।रोचिषीयाहंमनुष्येषु।सम्राड्‌घर्मरुचितस्त्वं
देवेष्वायुष्मांस्तेजस्वीब्रह्मवर्चस्यसि।रुचितोहंमनुष्येष्वायुष्मांस्तेजस्वी

ब्रह्मवर्च्चसीभूयासं।रुगसि।रुचंमयिधेहि।मयिरुक्।दक्षापुरस्तात्प्रोच्यसे।दक्षाद
क्षिणा।दक्षाप्रत्यङ्।दक्षोदङ्।दक्षो ध्रुवाभासिसुमनस्यमानः।सनःसम्राडिषमूर्ज्जंधे
हि।वाजीवाजिनेपवस्व।रोचितोघर्मोरुचीय।अप्नस्वतीमित्युक्ते पवित्राण्यूर्ध्वंधारयं
ति।अरूरुचदुषसःपृश्निरग्निइत्युक्तेरुचितोघर्मइत्युक्त्वायथेतंत्रिरपसव्यंपरीत्य
पवित्राणिनिधायऋत्विजोयजमानश्चसर्वेघर्ममुपतिष्ठंते।शांति।अपश्यंगोपाम
